International Journal of Sanskrit Research 2021; 7(3): 20-31

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(3): 20-31
© 2021 IJSR
www.anantaajournal.com
Received: 13-03-2021
Accepted: 17-04-2021

**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

# श्रीमद्भगवद्गीताया द्वितीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकतिप्रत्ययप्रक्रियाविमर्शः

**डॉ. धर्मेश शर्मा**

**सारांशः–**
श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीताया द्वितीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।

**कूटशब्दाः–** श्रीमद्भगवद्गीतायाः, द्वितीयाध्यायस्य, तिङन्तपदानाम्, व्याकरणात्मकः, प्रकृतिप्रत्ययप्रक्रियाविमर्शः।

**प्रस्तावना**
श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीताया द्वितीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।

**श्रीमद्भगवद्गीताया द्वितीयाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शः–**
तत्र तावत्–
**मा स्म गमः–** मा स्म इत्यव्ययोपपदो गम् इत्ययं धातुः– मा स्म गम्, 'स्मोत्तरे लङ् च' (अष्टाध्यायीसूत्रपाठः 3/3/176) इत्यनेन सूत्रेण गम् इत्यस्मात् परो लुङ् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– मा स्म गम् सि, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– मा स्म गम् स्, 'च्लि लुङि' (अष्टाध्यायीसूत्रपाठः 3/1/43) इत्यनेन सूत्रेण गम् इत्यस्मात् परः च्लि इत्ययं प्रत्ययः– मा स्म गम् च्लि स्, 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' (अष्टाध्यायीसूत्रपाठः 3/1/55) इत्यनेन सूत्रेण च्लि इत्यस्य स्थाने अङ् (अ) इत्ययमादेशः– मा स्म गम् अ स्, रुत्वम्, विसर्गः– मा स्म गम् अः– मा स्म गमः।

**उपपद्यते–** उप इत्युपसर्गपूर्वको पद् इत्ययं धातुः– उप पद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण पद् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– उप पद् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– उप पद् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण पद् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– उप पद् य त् ए– उपपद्यते।

**उत्तिष्ठ–** उत् इत्युपसर्गपूर्वकः स्था इत्ययं धातुः– उत् स्था, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण स्था इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– उत् स्था सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– उत् स्था हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स्था इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– उत् स्था अ हि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण स्था इत्यस्य स्थाने तिष्ठ् इत्ययमादेशः– उत् तिष्ठ् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– उत् तिष्ठ् अ– उत्तिष्ठ।

**प्रतियोत्स्यामि–** प्रति इत्युपसर्गपूर्वको युध् इत्ययं धातुः– प्रति युध्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण युध् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप्

(मि) इत्ययं प्रत्ययः– प्रति युध् मि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण युध् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– प्रति युध् स्य मि, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– प्रति य् ओ ध् स्य मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– प्रति य् ओ ध् स्य् आ मि, 'खरि च' (अष्टाध्यायीसूत्रपाठः 8/4/54) इत्यनेन सूत्रेण ध् इत्यस्य स्थाने चर् (त्) इत्ययमादेशः– प्रति य् ओ त् स्य् आ मि– प्रतियोत्स्यामि।

**भुञ्जीय–** भुज् इत्ययं धातुः– भुज्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण भुज् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, आत्मनेपदम्, उत्तमपुरुषः, एकवचनम्, इट् (इ) इत्ययं प्रत्ययः– भुज् इ, 'इटोऽत्' (अष्टाध्यायीसूत्रपाठः 3/4/106) इत्यनेन सूत्रेण इ इत्यस्य स्थाने अ इत्ययमादेशः– भुज् अ 'लिङः सीयुट्' (अष्टाध्यायीसूत्रपाठः 3/4/102) इत्यनेन सूत्रेण अ इत्यस्यादौ सीयुट् (सीय्) इत्ययमागमः– भुज् सीय् अ, 'रुधादिभ्यः श्नम्' (अष्टाध्यायीसूत्रपाठः 3/1/78) इत्यनेन सूत्रेण उ इत्यस्मात् परः श्नम् (न) इत्ययं प्रत्ययः– भु न ज् सीय् अ, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– भु न ज् ईय् अ, 'श्नसोरल्लोपः' (अष्टाध्यायीसूत्रपाठः 6/4/111) इत्यनेन सूत्रेण अ इत्यस्य लोपसंज्ञकमदर्शनम्– भु न् ज् ईय् अ, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण न् इत्यस्य स्थाने ञ् इत्ययमादेशः– भु ञ् ज् ईय् अ– भुञ्जीय।

**विद्मः–** विद् इत्ययं धातुः– विद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, बहुवचनम्, मस् इत्ययं प्रत्ययः– विद् मस्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण विद् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– विद् शप् मस्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– विद् मस्, रुत्वम्, विसर्गः– विद् मः– विद्मः।

**जयेम–** जि इत्ययं धातुः– जि, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण जि इत्यस्मात् परो लिङ् (विधिलिङ् लकारः, परस्मैपदम्, उत्तमपुरुषः, बहुवचनम्, मस् इत्ययं प्रत्ययः– जि मस्, 'नित्यं ङितः' (अष्टाध्यायीसूत्रपाठः 3/4/99) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– जि म, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण म इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– जि यास् म, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण जि इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– जि अ यास् म, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– जि अ या म, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थाने इय् इत्ययमादेशः– जि अ इय् म, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– जि अ इ म, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– ज् ए अ इ म, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– ज् अय् अ इ म, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– ज् अय् ए म– जयेम।

**जयेयुः–** जि इत्ययं धातुः– जि, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण जि इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– जि झि, 'झेर्जुस्' (अष्टाध्यायीसूत्रपाठः 3/4/99) इत्यनेन सूत्रेण झि इत्यस्य स्थाने जुस् (उस्) इत्ययमादेशः– जि उस्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण उस् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– जि यास् उस्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण जि इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– जि अ यास् उस्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– जि अ या उस्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थाने इय् इत्ययमादेशः– जि अ इय् उस्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– ज् ए अ इय् उस्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– ज् अय् अ इय् उस्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– ज् अय् ए य् उस्, रुत्वम्, विसर्गः– ज् अय् ए य् उः– जयेयुः।

**जिजीविषामः–** जीव् इत्ययं धातुः– जीव्, 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (अष्टाध्यायीसूत्रपाठः 3/1/7) इत्यनेन सूत्रेण जीव् इत्यस्मात् परः सन् (स) इत्ययं प्रत्ययः– जीव् स, 'आर्धधातुकस्येड् वलादेः' (अष्टाध्यायीसूत्रपाठः 7/2/35) इत्यनेन सूत्रेण स इत्यस्यादौ इट् (इ) इत्ययमागमः– जीव् इ स, 'सन्यङोः' (अष्टाध्यायीसूत्रपाठः 6/1/9) इत्यनेन सूत्रेण जीव् इत्यस्य स्थाने जीव् जीव् इत्ययं द्विर्वचनादेशः– जीव् जीव् इ स, 'ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 7/4/59) इत्यनेन सूत्रेण ई इत्यस्य स्थाने ह्रस्वसंज्ञकः (इ) इत्ययमादेशः– ज् इ व् जीव् इ स, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण ज् व् इत्यनयोः स्थाने ज् इत्ययं शेषादेशः– ज् इ जीव् इ स, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– ज् इ जीव् इ ष् अ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ज् इ जीव् इ ष् अ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, बहुवचनम्, मस् इत्ययं प्रत्ययः– ज् इ जीव् इ ष् अ मस्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ज् इ जीव् इ ष् अ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– ज् इ जीव् इ ष् अ अ मस्, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– ज् इ जीव् इ ष् अ मस्, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– ज् इ जीव् इ ष् आ मस्, रुत्वम्, विसर्गः– ज् इ जीव् इ ष् आ मः– जिजीविषामः।

**पृच्छामि–** प्रच्छ् इत्ययं धातुः– प्रच्छ्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण प्रच्छ् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– प्रच्छ् मि, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण प्रच्छ् इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– प्रच्छ् अ मि, 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (अष्टाध्यायीसूत्रपाठः 6/1/16) इत्यनेन सूत्रेण र् इत्यस्य स्थाने सम्प्रसारणसंज्ञकः (ऋ) इत्ययमादेशः– प् ऋ अ च्छ् अ मि, 'सम्प्रसारणाच्च' (अष्टाध्यायीसूत्रपाठः 6/1/104) इत्यनेन सूत्रेण ऋ

अ इत्यनयोः स्थाने पूर्वरूपः (ऋ) इत्ययमेकादेशः– प् ऋ च्छ् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– प् ऋ च्छ् आ मि– पृच्छामि।

**ब्रूहि–** ब्रू इत्ययं धातुः– ब्रू, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– ब्रू सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– ब्रू हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परः शप् इत्ययं प्रत्ययः– ब्रू शप् हि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– ब्रू हि– ब्रूहि।
शाधि– शास् इत्ययं धातुः– शास्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण शास् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– शास् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– शास् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण शास् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– शास् शप् हि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– शास् हि, 'शा हौ' (अष्टाध्यायीसूत्रपाठः 6/4/35) इत्यनेन सूत्रेण शास् इत्यस्य स्थाने शा इत्ययमादेशः– शा हि, 'हुझल्भ्यो हेर्धिः' (अष्टाध्यायीसूत्रपाठः 6/4/101) इत्यनेन सूत्रेण हि इत्यस्य स्थाने धि इत्ययमादेशः– शा धि– शाधि।

**प्रपश्यामि–** प्र इत्युपसर्गपूर्वको दृश् इत्ययं धातुः– प्र दृश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– प्र दृश् मि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– प्र दृश् अ मि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– प्र पश्य् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– प्र पश्य् आ मि– प्रपश्यामि।

**अपनुद्यात्–** अप इत्युपसर्गपूर्वको नुद् इत्ययं धातुः– अप नुद्, 'आशिषि लिङ्लोटौ' (अष्टाध्यायीसूत्रपाठः 3/3/173) इत्यनेन सूत्रेण नुद् इत्यस्मात् परो लिङ् (आशीर्लिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अप नुद् ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– अप नुद् त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– अप नुद् यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– अप नुद् यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– अप नुद् या स् त्, 'स्कोः संयोगाद्योरन्ते च' (अष्टाध्यायीसूत्रपाठः 8/2/29) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– अप नुद् या त्– अपनुद्यात्।

**योत्स्ये–** युध् इत्ययं धातुः– युध्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण युध् इत्यस्मात् परो लृट् लकारः, आत्मनेपदम्, उत्तमपुरुषः, एकवचनम्, इट् (इ) इत्ययं प्रत्ययः– युध् इ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण इ इत्यस्य स्थाने ए इत्ययमादेशः– युध् ए, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण युध् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– युध् स्य ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– य् ओ ध् स्य ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ ए इत्यनयोः स्थाने पररूपः (ए) इत्ययमेकादेशः– य् ओ ध् स्य् ए, 'खरि च' (अष्टाध्यायीसूत्रपाठः 8/4/54) इत्यनेन सूत्रेण ध् इत्यस्य स्थाने चर् (त्) इत्ययमादेशः– य् ओ त् स्य् ए– योत्स्ये।

**बभूव–** भू इत्ययं धातुः– भू, 'परोक्षे लिट्' (अष्टाध्यायीसूत्रपाठः 3/2/115) इत्यनेन सूत्रेण भू इत्यस्मात् परो लिट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् इत्ययं प्रत्ययः– भू तिप्, 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (अष्टाध्यायीसूत्रपाठः 3/4/82) इत्यनेन सूत्रेण तिप् इत्यस्य स्थाने णल् (अ) इत्ययमादेशः– भू अ, 'भुवो वुग्लुङ्लिटोः' (अष्टाध्यायीसूत्रपाठः 6/4/88) इत्यनेन सूत्रेण भू इत्यस्यान्ते वुक् (व्) इत्ययमागमः– भू व् अ, 'लिटि धातोरनभ्यासस्य' (अष्टाध्यायीसूत्रपाठः 6/1/8) इत्यनेन सूत्रेण भू व् इत्यस्य स्थाने भू व् भू व् इत्ययं द्विर्वचनादेशः– भू व् भू व् अ, 'ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 7/4/59) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने ह्रस्वसंज्ञकः (उ) इत्ययमादेशः– भ् उ व् भू व् अ, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण भ् व् इत्यनयोः स्थाने भ् इत्ययं शेषादेशः– भ् उ भू व् अ, 'भवतेरः' (अष्टाध्यायीसूत्रपाठः 7/4/73) इत्यनेन सूत्रेण उ इत्यस्य स्थाने अ इत्ययमादेशः– भ् अ भू व् अ, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण भ् इत्यस्य स्थाने जश् (ब्) इत्ययमादेशः– ब् अ भू व् अ– बभूव।

**अन्वशोचः–** अनु इत्युपसर्गपूर्वकः शुच् इत्ययं धातुः– अनु शुच्, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 3/2/111) इत्यनेन सूत्रेण शुच् इत्यस्मात् परो लङ् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– अनु शुच् सि, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– अनु शुच् स्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण शुच् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु शुच् अ स्, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– अनु श् ओ च् अ स्, 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (अष्टाध्यायीसूत्रपाठः 6/4/71) इत्यनेन सूत्रेण श् ओ च् अ स् इत्यस्यादौ अट् (अ) इत्ययमागमः– अनु अ श् ओ च् अ स्, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण उ इत्यस्य स्थाने यण् (व्) इत्ययमादेशः– अन् व् अ श् ओ च् अ स्, रुत्वम्, विसर्गः– अन्वशोचः।

**भाषसे–** भाष् इत्ययं धातुः– भाष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भाष् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– भाष् थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– भाष् से, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भाष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भाष् अ से– भाषसे।

**अनुशोचन्ति–** अनु इत्युपसर्गपूर्वकः शुच् इत्ययं धातुः– अनु शुच्, **'वर्तमाने लट्'** (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण शुच् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– अनु शुच् झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण शुच् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु शुच् अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– अनु शुच् अ अन्त् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86)

इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– अनु श् ओ च् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– अनु श् ओ च् अ न्त् इ– अनुशोचन्ति।

**आसम्–** अस् इत्ययं धातुः– अस्, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 3/2/111) इत्यनेन सूत्रेण अस् इत्यस्मात् परो लङ् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् इत्ययं प्रत्ययः– अस् मिप्, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण मिप् इत्यस्य स्थाने अम् इत्ययमादेशः– अस् अम्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– अस् शप् अम्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– अस् अम्, 'आडजादीनाम्' (अष्टाध्यायीसूत्रपाठः 6/4/72) इत्यनेन सूत्रेण अस् इत्यस्यादौ आट् (आ) इत्ययमागमः– आ अस् अम्, 'आटश्च' (अष्टाध्यायीसूत्रपाठः 6/1/87) इत्यनेन सूत्रेण आ अ इत्यनयोः स्थाने वृद्धिसंज्ञकः (आ) इत्ययमादेशः– आ स् अम्– आसम्।

**भविष्यामः–** भू इत्ययं धातुः– भू, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण भू इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, उत्तमपुरुषः, बहुवचनम्, मस् इत्ययं प्रत्ययः– भू मस्, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण भू इत्यस्मात् परः स्य इत्ययं प्रत्ययः– भू स्य मस्, 'आर्धधातुकस्येड् वलादेः' (अष्टाध्यायीसूत्रपाठः 7/2/35) इत्यनेन सूत्रेण स्य इत्यस्यादौ इट् (इ) इत्ययमागमः– भू इ स्य मस्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– भ् ओ इ स्य मस्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– भ् अव् इ स्य मस्, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– भ् अव् इ स्य् आ मस्, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– भ् अव् इ ष् य् आ मस्, रुत्वम्, विसर्गः– भविष्यामः।

**मुह्यति–** मुह इत्ययं धातुः– मुह्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण मुह इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– मुह् ति, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/59) इत्यनेन सूत्रेण मुह इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– मुह् य ति– मुह्यति।

**तितिक्षस्व–** तिज् इत्ययं धातुः– तिज्, 'गुप्तिज्किद्भ्यः सन्' (अष्टाध्यायीसूत्रपाठः 3/1/5) इत्यनेन सूत्रेण तिज् इत्यस्मात् परः सन् (स) इत्ययं प्रत्ययः– तिज् स, 'सन्यङोः' (अष्टाध्यायीसूत्रपाठः 6/1/9) इत्यनेन सूत्रेण तिज् स् इत्यस्य स्थाने तिज्स् तिज्स् इत्ययं द्विर्वचनादेशः– तिज्स् तिज्स् अ, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण त् ज् स् इत्येषां स्थाने त् इत्ययं शेषादेशः– त् इ तिज्स् अ, 'चोः कुः' (अष्टाध्यायीसूत्रपाठः 8/2/30) इत्यनेन सूत्रेण ज् इत्यस्य स्थाने कुः (ग्) इत्ययमादेशः– त् इ ति ग् स् अ, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने (ष्) इत्ययं मूर्धन्यादेशः– त् इ ति ग् ष् अ, 'खरि च' (अष्टाध्यायीसूत्रपाठः 8/4/54) इत्यनेन सूत्रेण ग् इत्यस्य स्थाने चर् (क्) इत्ययमादेशः– त् इ ति क् ष् अ, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण त् इ ति क् ष् अ इत्यस्मात् परो लोट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– त् इ ति क् ष् अ थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– त् इ ति क् ष् अ से, 'सवाभ्यां वामौ' (अष्टाध्यायीसूत्रपाठः 3/4/91) इत्यनेन सूत्रेण ए इत्यस्य स्थाने व इत्ययमादेशः– त् इ ति क् ष् अ स् व, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण त् इ ति क् ष् अ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– त् इ ति क् ष् अ अ स् व, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– त् इ ति क् ष् अ स् व– तितिक्षस्व।

**व्यथयन्ति–** व्यथ् इत्ययं धातुः– व्यथ्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण व्यथ् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– व्यथ् इ, 'अत उपधायाः' (अष्टाध्यायीसूत्रपाठः 7/2/116) इत्यनेन सूत्रेण अ इत्यस्य स्थाने वृद्धिसंज्ञकः (आ) इत्ययमादेशः– व्य् आ थ् इ, 'मितां ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 6/4/92) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ह्रस्वसंज्ञकः (अ) इत्ययमादेशः– व्य् अ थ् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण व्य् अ थ् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– व्य् अ थ् इ झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण व्य् अ थ् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– व्य् अ थ् इ अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– व्य् अ थ् इ अ अन्त् इ, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– व्य् अ थ् ए अ अन्त् इ, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– व्य् अ थ् अय् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– व्य् अ थ् अय् अ न्त् इ– व्यथयन्ति।

**कल्पते–** कृप् इत्ययं धातुः– कृप्, 'कृपो रो लः' (अष्टाध्यायीसूत्रपाठः 8/2/18) इत्यनेन सूत्रेण ऋ इत्यस्य रेफश्रुतेः (र्) इत्यस्याः स्थाने लश्रुतिः (ल्) इत्ययमादेशः– क् लृ प्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण क् लृ प् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– क् लृ प् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– क् लृ प् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण क् लृ प् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– क् लृ प् अ त् ए, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण लृ इत्यस्य स्थाने गुणसंज्ञकः (अल्) इत्ययमादेशः– क् अल् प् अ त् ए– कल्पते।

**विद्यते–** विद् इत्ययं धातुः– विद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– विद् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– विद् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण विद् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– विद् य त् ए– विद्यते।

**विद्धि–** विद् इत्ययं धातुः– विद्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– विद् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– विद् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण विद् इत्यस्मात् परः

शप् इत्ययं प्रत्ययः– विद् शप् हि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– विद् हि, 'हुझल्भ्यो हेर्धिः' (अष्टाध्यायीसूत्रपाठः 6/4/101) इत्यनेन सूत्रेण हि इत्यस्य स्थाने धि इत्ययमादेशः– विद् धि– विद्धि।

**अर्हति–** अर्ह् इत्ययं धातुः– अर्ह्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण अर्ह् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अर्ह् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अर्ह् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अर्ह् अ ति– अर्हति।
युध्यस्व– युध् इत्ययं धातुः– युध्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण युध् इत्यस्मात् परो लोट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– युध् थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– युध् से, 'सवाभ्यां वामौ' (अष्टाध्यायीसूत्रपाठः 3/4/91) इत्यनेन सूत्रेण ए इत्यस्य स्थाने व इत्ययमादेशः– युध् स् व, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण युध् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– युध् य स् व– युध्यस्व।

**वेत्ति–** विद् इत्ययं धातुः– विद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– विद् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण विद् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– विद् शप् ति, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– विद् ति, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– व् ए द् ति, 'खरि च' (अष्टाध्यायीसूत्रपाठः 8/4/54) इत्यनेन सूत्रेण द् इत्यस्य स्थाने चर् (त्) इत्ययमादेशः– व् ए त् ति– वेत्ति।

**मन्यते–** मन् इत्ययं धातुः– मन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण मन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– मन् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– मन् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण मन् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– मन् य त् ए– मन्यते।

**विजानीतः–** वि इत्युपसर्गपूर्वको ज्ञा इत्ययं धातुः– वि ज्ञा, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ज्ञा इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, द्विवचनम्, तस् इत्ययं प्रत्ययः– वि ज्ञा तस्, 'क्र्यादिभ्यः श्ना' (अष्टाध्यायीसूत्रपाठः 3/1/81) इत्यनेन सूत्रेण ज्ञा इत्यस्मात् परः श्ना (ना) इत्ययं प्रत्ययः– वि ज्ञा ना तस्, 'ज्ञाजनोर्जा' (अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण ज्ञा इत्यस्य स्थाने जा इत्ययमादेशः– वि जा ना तस्, 'ई हल्यघोः' (अष्टाध्यायीसूत्रपाठः 6/4/113) इत्यनेन सूत्रेण आ इत्यस्य स्थान ई इत्ययमादेशः– वि जा न् ई तस्, रुत्वम्, विसर्गः– वि जा न् ई तः– विजानीतः।

**हन्ति–** हन् इत्ययं धातुः– हन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हन् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– हन् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हन् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– हन् शप् ति, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– हन् ति– हन्ति।

**हन्यते–** हन् इत्ययं धातुः– हन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– हन् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– हन् त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण हन् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– हन् य त् ए– हन्यते।

**जायते–** जन् इत्ययं धातुः– जन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– जन् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– जन् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण जन् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– जन् य त् ए, 'ज्ञाजनोर्जा' (अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण जन् इत्यस्य स्थाने जा इत्ययमादेशः– जा य त् ए– जायते।

**म्रियते–** मृ इत्ययं धातुः– मृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण मृ इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– मृ त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– मृ त् ए, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण मृ इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– मृ अ त् ए, 'रिङ् शयग्लिङ्क्षु' (अष्टाध्यायीसूत्रपाठः 7/4/28) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने रिङ् (रि) इत्ययमादेशः– म् रि अ त् ए, 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (अष्टाध्यायीसूत्रपाठः 6/4/77) इत्यनेन सूत्रेण इ इत्यस्य स्थान इयङ् (इय्) इत्ययमादेशः– म् र् इय् अ त् ए– म्रियते।

**वेद–** विद् इत्ययं धातुः– विद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् इत्ययं प्रत्ययः– विद् तिप्, 'विदो लटो वा' (अष्टाध्यायीसूत्रपाठः 3/4/83) इत्यनेन सूत्रेण तिप् इत्यस्य स्थाने णल् (अ) इत्ययमादेशः– विद् अ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण विद् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– विद् शप् अ, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– विद् अ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– व् ए द् अ– वेद।

**घातयति–** हन् इत्ययं धातुः– हन्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण हन् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– हन् इ, 'हो हन्तेर्ञ्णिन्नेषु' (अष्टाध्यायीसूत्रपाठः 7/3/54) इत्यनेन सूत्रेण ह् इत्यस्य स्थाने घ् इत्ययमादेशः– घ् अ न् इ, 'हनस्तोऽचिण्णलोः' (अष्टाध्यायीसूत्रपाठः 7/3/32) इत्यनेन सूत्रेण न् इत्यस्य स्थाने त् इत्ययमादेशः– घ् अ त् इ, 'अत उपधायाः' (अष्टाध्यायीसूत्रपाठः 7/2/116) इत्यनेन सूत्रेण अ इत्यस्य स्थाने वृद्धिसंज्ञकः (आ) इत्ययमादेशः– घ् आ त् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण घ् आ त् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– घ् आ त् इ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण घ् आ त् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– घ् आ त् इ अ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– घ् आ त् ए अ ति, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन

सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– घ् आ त् अय् अ ति– घातयति।

**गृह्णाति–** ग्रह् इत्ययं धातुः– ग्रह्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ग्रह् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– ग्रह् ति, 'क्र्यादिभ्यः श्ना' (अष्टाध्यायीसूत्रपाठः 3/1/81) इत्यनेन सूत्रेण ग्रह् इत्यस्मात् परः श्ना (ना) इत्ययं प्रत्ययः– ग्रह् ना ति, 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (अष्टाध्यायीसूत्रपाठः 6/1/16) इत्यनेन सूत्रेण र् इत्यस्य स्थाने सम्प्रसारणसंज्ञकः (ऋ) इत्ययमादेशः– ग् ऋ अ ह् ना ति, 'सम्प्रसारणाच्च' (अष्टाध्यायीसूत्रपाठः 6/1/104) इत्यनेन सूत्रेण ऋ अ इत्यनयोः स्थाने पूर्वरूपः (ऋ) इत्ययमादेशः– ग् ऋ ह् ना ति, 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (अष्टाध्यायीसूत्रपाठः 8/4/2) इत्यनेन सूत्रेण न् इत्यस्य स्थाने ण् इत्ययमादेशः– ग् ऋ ह् ण् आ ति– गृह्णाति।

**संयाति–** समित्युपसर्गपूर्वको या इत्ययं धातुः– सम् या, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण या इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– सम् या ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण या इत्यस्मात् परः शप् इत्ययं प्रत्ययः– सम् या शप् ति, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– सम् या ति, 'मोऽनुस्वारः' (अष्टाध्यायीसूत्रपाठः 8/3/23) इत्यनेन सूत्रेण म् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– सं या ति– संयाति।

**छिन्दन्ति–** छिद् इत्ययं धातुः– छिद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण छिद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– छिद् झि, 'रुधादिभ्यः श्नम्' (अष्टाध्यायीसूत्रपाठः 3/1/78) इत्यनेन सूत्रेण इ इत्यस्मात् परः श्नम् (न) इत्ययं प्रत्ययः– छ् इ न द् झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– छ् इ न द् अन्त् इ, 'श्नसोरल्लोपः' (अष्टाध्यायीसूत्रपाठः 6/4/111) इत्यनेन सूत्रेण अ इत्यस्य लोपसंज्ञकमदर्शनम्– छ् इ न् द् अन्त इ– छिन्दन्ति।

**दहति–** दह् इत्ययं धातुः– दह्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दह् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– दह् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दह् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– दह् अ ति– दहति।

**क्लेदयन्ति–** क्लिद् इत्ययं धातुः– क्लिद्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण क्लिद् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– क्लिद् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– क्ल् ए द् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण क्ल् ए द् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– क्ल् ए द् इ झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण क्ल् ए द् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– क्ल् ए द् इ अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– क्ल् ए द् इ अ अन्त् इ, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– क्ल् ए द् ए अ अन्त् इ, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– क्ल् ए द् अय् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमादेशः– क्ल् ए द् अय् अ न्त् इ– क्लेदयन्ति।

**शोषयति–** शुष् इत्ययं धातुः– शुष्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण शुष् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– शुष् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– श् ओ ष् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः3/2/123) इत्यनेन सूत्रेण श् ओ ष् इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– श् ओ ष् इ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण श् ओ ष् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– श् ओ ष् इ अ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– श् ओ ष् ए अ ति, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– श् ओ ष् अय् अ ति– शोषयति।

**उच्यते–** वच् इत्ययं धातुः– वच्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वच् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– वच् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– वच् त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण वच् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– वच् य त् ए, 'वचिस्वपियजादीनां किति' (अष्टाध्यायीसूत्रपाठः 6/1/15) इत्यनेन सूत्रेण व् इत्यस्य स्थाने सम्प्रसारणसंज्ञकः (उ) इत्ययमादेशः– उ अ च् य त् ए, 'सम्प्रसारणाच्च' (अष्टाध्यायीसूत्रपाठः 6/1/104) इत्यनेन सूत्रेण उ अ इत्यनयोः स्थाने पूर्वरूपः (उ) इत्ययमेकादेशः– उ च् य त् ए– उच्यते।

**अर्हसि–** अर्ह् इत्ययं धातुः– अर्ह्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण अर्ह् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– अर्ह् सि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अर्ह् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अर्ह् अ सि– अर्हसि।

**मन्यसे–** मन् इत्ययं धातुः– मन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण मन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– मन् थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– मन् से, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण मन् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– मन् य से– मन्यसे।

**पश्यति–** दृश् इत्ययं धातुः– दृश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– दृश् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– दृश् अ ति, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– पश्य् अ ति– पश्यति।

**वदति–** वद् इत्ययं धातुः– वद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– वद् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वद् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वद् अ ति– वदति।

**शृणोति–** श्रु इत्ययं धातुः– श्रु, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण श्रु इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– श्रु ति, 'श्रुवः शृ च' (अष्टाध्यायीसूत्रपाठः 3/1/74) इत्यनेन सूत्रेण श्रु इत्यस्मात् परः श्नु (नु) इत्ययं प्रत्ययः श्रु इत्यस्य च स्थाने शृ इत्ययमादेशः– शृ नु ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– शृ न् ओ ति, 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (अष्टाध्यायीसूत्रपाठः 8/4/2) इत्यनेन सूत्रेण न् इत्यस्य स्थाने ण् इत्ययमादेशः– शृ ण् ओ ति– शृणोति।

**लभन्ते–** लभ् इत्ययं धातुः– लभ्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण लभ् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– लभ् झ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण लभ् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– लभ् अ झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– लभ् अ झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– लभ् अ अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमादेशः– लभ् अ न्त् ए– लभन्ते।

**करिष्यसि–** कृ इत्ययं धातुः– कृ, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– कृ सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण कृ इत्यस्मात् परः स्य इत्ययं प्रत्ययः– कृ स्य सि, 'ऋद्धनोः स्ये' (अष्टाध्यायीसूत्रपाठः 7/2/70) इत्यनेन सूत्रेण स्य इत्यस्यादौ इट् (इ) इत्ययमागमः– कृ इ स्य सि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् इ स्य सि, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– क् अर् इ ष् य सि– करिष्यसि।

**अवाप्स्यसि–** अव इत्युपसर्गपूर्वक आप् इत्ययं धातुः– अव आप्, **'लृट् शेषे च'** (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण आप् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– अव आप् सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण आप् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– अव आप् स्य सि, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– अव् आ प् स्य सि– अवाप्स्यसि।

**कथयिष्यन्ति–** कथ इत्ययं धातुः– कथ, 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण– चुरादिभ्यो णिच्' (अष्टाध्यायीसूत्रपाठः 3/1/25) इत्यनेन सूत्रेण कथ इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– कथ इ, 'अतो लोपः' (अष्टाध्यायीसूत्रपाठः 6/4/48) इत्यनेन सूत्रेण अ इत्यस्य लोपसंज्ञकमदर्शनम्– कथ् इ, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण कथ् इ इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– कथ् इ झि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण कथ् इ इत्यस्मात् परः स्य इत्ययं प्रत्ययः– कथ् इ स्य झि, 'आर्धधातुकस्येड् वलादेः' (अष्टाध्यायीसूत्रपाठः 7/2/35) इत्यनेन सूत्रेण स्य इत्यस्यादौ इट् (इ) इत्ययमागमः– कथ् इ इ स्य झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– कथ् इ इ स्य अन्त् इ, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– कथ् ए इ स्य अन्त् इ, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– कथ् अय् इ स्य अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– कथ् अय् इ स्य् अ न्त् इ, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– कथ् अय् इ ष् य् अ न्त् इ– कथयिष्यन्ति।

**अतिरिच्यते–** अति इत्युपसर्गपूर्वको रिच् इत्ययं धातुः– अति रिच्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण रिच् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– अति रिच् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– अति रिच् त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण रिच् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– अति रिच् य त् ए– अतिरिच्यते।

**मंस्यन्ते–** मन् इत्ययं धातुः– मन्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण मन् इत्यस्मात् परो लृट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– मन् झ, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण मन् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– मन् स्य झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– मन् स्य झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– मन् स्य अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– मन् स्य् अ न्त् ए, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण न् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– मं स्य् अ न्त् ए– मंस्यन्ते।

**यास्यसि–** या इत्ययं धातुः– या, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण या इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– या सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण या इत्यस्मात् परः स्य इत्ययं प्रत्ययः– या स्य सि– यास्यसि।

वदिष्यन्ति– वद् इत्ययं धातुः– वद्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण वद् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– वद् झि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण वद् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– वद् स्य झि, 'आर्धधातुकस्येड् वलादेः' (अष्टाध्यायीसूत्रपाठः 7/2/35) इत्यनेन सूत्रेण स्य इत्यस्यादौ इट् (इ) इत्ययमागमः– वद् इ स्य झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– वद् इ स्य अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– वद् इ स्य् अ न्त् इ, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– वद् इ ष् य् अ न्त् इ– वदिष्यन्ति।

**प्राप्स्यसि–** प्र इत्युपसर्गपूर्वक आप् इत्ययं धातुः– प्र आप्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण आप् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– प्र आप् सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण आप् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– प्र आप् स्य सि, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– प्र् आ प् स्य सि– प्राप्स्यसि।

**भोक्ष्यसे–** भुज् इत्ययं धातुः– भुज्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण भुज् इत्यस्मात् परो लृट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– भुज् थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– भुज् से, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण भुज् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– भुज् स्य से, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– भ् ओ ज् स्य से, 'चोः कुः' (अष्टाध्यायीसूत्रपाठः 8/2/30) इत्यनेन सूत्रेण ज् इत्यस्य स्थाने ग् इत्ययमादेशः– भ् ओ ग् स्य से, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– भ् ओ ग् ष् य से, 'खरि च' (अष्टाध्यायीसूत्रपाठः 8/4/54) इत्यनेन सूत्रेण ग् इत्यस्य स्थाने चर् (क्) इत्ययमादेशः– भ् ओ क् ष् य से– भोक्ष्यसे।

**युज्यस्व–** युज् 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण युज् इत्यस्मात् परो लोट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– युज् थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– युज् से, 'सवाभ्यां वामौ' (अष्टाध्यायीसूत्रपाठः 3/4/91) इत्यनेन सूत्रेण ए इत्यस्य स्थाने व इत्ययमादेशः– युज् स् व, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण युज् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– युज् य स् व– युज्यस्व।

**शृणु–** श्रु इत्ययं धातुः– श्रु, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण श्रु इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– श्रु सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– श्रु हि, 'श्रुवः शृ च' (अष्टाध्यायीसूत्रपाठः 3/1/74) इत्यनेन सूत्रेण श्रु इत्यस्मात् परः श्नु (नु) इत्ययं प्रत्ययः श्रु इत्यस्य च स्थाने शृ इत्ययमादेशः– शृ नु हि, 'उतश्च प्रत्ययादसंयोगपूर्वात्' (अष्टाध्यायीसूत्रपाठः 6/4/106) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– शृ नु, 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (अष्टाध्यायीसूत्रपाठः 8/4/2) इत्यनेन सूत्रेण न् इत्यस्य स्थाने ण् इत्ययमादेशः– शृ ण् उ– शृणु।

**प्रहास्यसि–** प्र इत्युपसर्गपूर्वको हा इत्ययं धातुः– प्र हा, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण हा इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– प्र हा सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण हा इत्यस्मात् परः स्य इत्ययं प्रत्ययः– प्र हा स्य सि– प्रहास्यसि।

**अस्ति–** अस् इत्ययं धातुः– अस्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण अस् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अस् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– अस् शप् ति, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– अस् ति– अस्ति।

**त्रायते–** त्रै इत्ययं धातुः– त्रै, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण त्रै इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– त्रै त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– त्रै त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण त्रै इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– त्रै अ त् ए, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ऐ इत्यस्य स्थाने आय् इत्ययमादेशः– त्र् आय् अ त् ए– त्रायते।

**प्रवदन्ति–** प्र इत्युपसर्गपूर्वको वद् इत्ययं धातुः– प्र वद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– प्र वद् झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वद् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– प्र वद् अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– प्र वद् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– प्र वद् अ न्त् इ– प्रवदन्ति।

**विधीयते–** वि इत्युपसर्गपूर्वको धा इत्ययं धातुः– वि धा, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण धा इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– वि धा त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– वि ध त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण धा इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– वि धा य त् ए, 'घुमास्थागापाजहातिसां हलि' (अष्टाध्यायीसूत्रपाठः 6/4/66) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ई इत्ययमादेशः– वि ध् ई य त् ए– विधीयते।

**भव–** भू इत्ययं धातुः– भू, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण भू इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– भू सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– भू हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भू इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भू अ हि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– भ् ओ अ हि, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– भ् अव् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– भ् अव् अ– भव।

**मा भूः–** मा इत्यव्ययोपपदो भू इत्ययं धातुः– मा भू, 'माङि लुङ्' (अष्टाध्यायीसूत्रपाठः 3/3/175) इत्यनेन सूत्रेण भू इत्यस्मात् परो लुङ् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– मा भू सि, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– मा भू स्, 'च्लि लुङि' (अष्टाध्यायीसूत्रपाठः 3/1/43) इत्यनेन सूत्रेण भू इत्यस्मात् परः च्लि इत्ययं प्रत्ययः– मा भू च्लि स्, 'च्लेः सिच्' (अष्टाध्यायीसूत्रपाठः 3/1/44) इत्यनेन सूत्रेण च्लि इत्यस्य स्थाने सिच् इत्ययमादेशः– मा भू सिच् स्, 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' (अष्टाध्यायीसूत्रपाठः 2/4/77) इत्यनेन सूत्रेण सिच्

इत्यस्य लुक्संज्ञकमदर्शनम्– मा भू स्, रुत्वम्, विसर्गः– मा भूः– मा भूः।

**कुरु–** कृ इत्ययं धातुः– कृ, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– कृ सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– कृ हि, 'तनादिकृञ्भ्य उः' (अष्टाध्यायीसूत्रपाठः 3/1/79) इत्यनेन सूत्रेण कृ इत्यस्मात् पर उ इत्ययं प्रत्ययः– कृ उ हि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् उ हि, 'अत उत्सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/110) इत्यनेन सूत्रेण अ इत्यस्य स्थाने उ इत्ययमादेशः– क् उ र् उ हि, 'उतश्च प्रत्ययादसंयोगपूर्वात्' (अष्टाध्यायीसूत्रपाठः 6/4/106) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– क् उ र् उ– कुरु।

**अन्विच्छ–** अनु इत्युपसर्गपूर्वक इष् इत्ययं धातुः– अनु इष्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण इष् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– अनु इष् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– अनु इष् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण इष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु इष् अ हि, 'इषुगमियमां छः' (अष्टाध्यायीसूत्रपाठः 7/3/77) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने छ् इत्ययमादेशः– अनु इ छ् अ हि, 'छे च' (अष्टाध्यायीसूत्रपाठः 6/1/71) इत्यनेन सूत्रेण इ इत्यस्यान्ते तुक् (त्) इत्ययमागमः– अनु इ त् छ् अ हि, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण त् इत्यस्य स्थाने च् इत्ययमादेशः– अनु इ च् छ् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– अनु इ च् छ् अ, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण उ इत्यस्य स्थाने व् इत्ययमादेशः– अ न् व् इ च् छ् अ– अन्विच्छ।

**जहाति–** हा इत्ययं धातुः– हा, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हा इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– हा ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हा इत्यस्मात् परः शप् इत्ययं प्रत्ययः– हा शप् ति, 'जुहोत्यादिभ्यः श्लुः' (अष्टाध्यायीसूत्रपाठः 2/4/75) इत्यनेन सूत्रेण शप् इत्यस्य श्लुसंज्ञकमदर्शनम्– हा ति, 'श्लौ' (अष्टाध्यायीसूत्रपाठः 6/1/10) इत्यनेन सूत्रेण हा इत्यस्य स्थाने हा हा इत्ययं द्विर्वचनादेशः– हा हा ति, 'ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 7/4/59) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ह्रस्वसंज्ञकः (अ) इत्ययमादेशः– ह् अ हा ति, 'कुहोश्चुः' (अष्टाध्यायीसूत्रपाठः 7/4/62) इत्यनेन सूत्रेण ह् इत्यस्य स्थाने झ् इत्ययमादेशः– झ् अ हा ति, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने ज् इत्ययमादेशः– ज् अ हा ति– जहाति।

**गच्छन्ति–** गम् इत्ययं धातुः– गम्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण गम् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– गम् झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण गम् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– गम् अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– गम् अ अन्त् इ, 'इषुगमियमां छः' (अष्टाध्यायीसूत्रपाठः 7/3/77) इत्यनेन सूत्रेण म् इत्यस्य स्थाने छ् इत्ययमादेशः– ग छ् अ अन्त् इ, 'छे च' (अष्टाध्यायीसूत्रपाठः 6/1/71) इत्यनेन सूत्रेण अ इत्यस्यान्ते तुक् (त्) इत्ययमागमः– ग त् छ् अ अन्त् इ, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण त् इत्यस्य स्थाने च् इत्ययमादेशः– ग च् छ् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– ग च् छ् अ न्त् इ– गच्छन्ति।

**व्यतितरिष्यति–** वि अति इत्युपसर्गपूर्वकः तॄ इत्ययं धातुः– तॄ, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण तॄ इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– वि अति तॄ ति, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण तॄ इत्यस्मात् परः स्य इत्ययं प्रत्ययः– वि अति तॄ स्य ति, 'आर्धधातुकस्येड् वलादेः' (अष्टाध्यायीसूत्रपाठः 7/2/35) इत्यनेन सूत्रेण स्य इत्यस्यादौ इट् (इ) इत्ययमागमः– वि अति तॄ इ स्य ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ॠ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– वि अति त् अर् इ स्य ति, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने मूर्धन्यः (ष्) इत्ययमादेशः– वि अति त् अर् इ ष् य ति, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण इ इत्यस्य स्थाने यण् (य्) इत्ययमादेशः– व् य् अति त् अर् इ ष् य ति– व्यतितरिष्यति।

**गन्तासि–** गम् इत्ययं धातुः– गम्, 'अनद्यतने लुट्' (अष्टाध्यायीसूत्रपाठः 3/3/15) इत्यनेन सूत्रेण गम् इत्यस्मात् परो लुट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– गम् सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण गम् इत्यस्मात् परः तासि (तास्) इत्ययं प्रत्ययः– गम् तास् सि, 'तासस्त्योर्लोपः' (अष्टाध्यायीसूत्रपाठः 7/4/50) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– गम् ता सि, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण म् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– गं ता सि, 'अनुस्वारस्य ययि परसवर्णः' (अष्टाध्यायीसूत्रपाठः 8/4/57) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (न्) इत्ययमादेशः– ग न् ता सि– गन्तासि।

**स्थास्यति–** स्था इत्ययं धातुः– स्था, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण स्था इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– स्था ति, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण स्था इत्यस्मात् परः स्य इत्ययं प्रत्ययः– स्था स्य ति– स्थास्यति।

**प्रभाषेत–** प्र इत्युपसर्गपूर्वको भाष् इत्ययं धातुः– प्र भाष्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण भाष् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– प्र भाष् त, 'लिङः सीयुट्' (अष्टाध्यायीसूत्रपाठः 3/4/102) इत्यनेन सूत्रेण त इत्यस्यादौ सीयुट् (सीय्) इत्ययमागमः– प्र भाष् सीय् त, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– प्र भाष् सीय् स् त, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भाष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– प्र भाष् अ सीय् स् त, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– प्र भाष् अ ईय् त, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ ई इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– प्र भाष् ए य् त, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– प्र भाष् ए त– प्रभाषेत।

**आसीत–** आस् इत्ययं धातुः– आस्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण आस् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– आस् त, 'लिङः सीयुट्' (अष्टाध्यायीसूत्रपाठः 3/4/102) इत्यनेन सूत्रेण त इत्यस्यादौ सीयुट् (सीय्) इत्ययमागमः– आस् सीय् त, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– आस् सीय् स् त, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण आस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– आस् शप् सीय् स् त, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– आस् सीय् स् त, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लुक्संज्ञकमदर्शनम्– आस् ईय् त, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– आस् ई त– आसीत।

**व्रजेत–** व्रज् इत्ययं धातुः– व्रज्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण व्रज् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– व्रज् त, 'लिङः सीयुट्' (अष्टाध्यायीसूत्रपाठः 3/4/102) इत्यनेन सूत्रेण त इत्यस्यादौ सीयुट् (सीय्) इत्ययमागमः– व्रज् सीय् त, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– व्रज् सीय् स् त, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण व्रज् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– व्रज् अ सीय् स् त, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लुक्संज्ञकमदर्शनम्– व्रज् अ ईय् त, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ ई इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– व्रज् ए य् त, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– व्रज् ए त– व्रजेत।

**प्रजहाति–** प्र इत्युपसर्गपूर्वको हा इत्ययं धातुः– प्र हा, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हा इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– प्र हा ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हा इत्यस्मात् परः शप् इत्ययं प्रत्ययः– प्र हा शप् ति, 'जुहोत्यादिभ्यः श्लुः' (अष्टाध्यायीसूत्रपाठः 2/4/75) इत्यनेन सूत्रेण शप् इत्यस्य श्लुसंज्ञकमदर्शनम्– प्र हा ति, 'श्लौ' (अष्टाध्यायीसूत्रपाठः 6/1/10) इत्यनेन सूत्रेण हा इत्यस्य स्थाने हा हा इत्ययं द्विर्वचनादेशः– प्र हा हा ति, 'ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 7/4/59) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ह्रस्वसंज्ञकः (अ) इत्ययमादेशः– प्र ह् अ हा ति, 'कुहोश्चुः' (अष्टाध्यायीसूत्रपाठः 7/4/62) इत्यनेन सूत्रेण ह इत्यस्य स्थाने झ इत्ययमादेशः– प्र झ् अ हा ति, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने ज् इत्ययमादेशः– प्र ज् अ हा ति– प्रजहाति।

**अभिनन्दति–** अभि इत्युपसर्गपूर्वको नद् इत्ययं धातुः– अभि नद्, 'इदितो नुम्धातोः' (अष्टाध्यायीसूत्रपाठः 7/1/58) इत्यनेन सूत्रेण अ इत्यस्मात् परो नुम् (न्) इत्ययमागमः– अभि न न् द्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण न न् द् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अभि न न् द् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण न न् द् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अभि न न् द् अ ति– अभिनन्दति।

**द्वेष्टि–** द्विष् इत्ययं धातुः– द्विष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण द्विष् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– द्विष् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण द्विष् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– द्विष् शप् ति, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– द्विष् ति, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– द्व् ए ष् ति, 'ष्टुना ष्टुः' (अष्टाध्यायीसूत्रपाठः 8/4/40) इत्यनेन सूत्रेण त् इत्यस्य स्थाने ट् इत्ययमादेशः– द्व् ए ष् ट् इ– द्वेष्टि।

**संहरते–** सम् इत्युपसर्गपूर्वको हृ इत्ययं धातुः– सम् हृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हृ इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– सम् हृ त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– सम् हृ त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हृ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– सम् हृ अ त् ए, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– सम् ह् अर् अ त् ए, 'मोऽनुस्वारः' (अष्टाध्यायीसूत्रपाठः 8/3/23) इत्यनेन सूत्रेण म् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– सं ह् अर् अ त् ए– संहरते।

**विनिवर्तन्ते–** वि नि इत्युपसर्गपूर्वको वृत् इत्ययं धातुः– वि नि वृत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– वि नि वृत् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– वि नि वृत् झ् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वि नि वृत् अ झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– वि नि वृत् अ अन्त् ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– वि नि व् अर् त् अ अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– वि नि व् अर् त् अ न्त् ए– विनिवर्तन्ते।

**निवर्तते–** नि इत्युपसर्गपूर्वको वृत् इत्ययं धातुः– नि वृत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– नि वृत् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– नि वृत् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– नि वृत् अ त् ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– नि व् अर् त् अ त् ए– निवर्तते।

**हरन्ति–** हृ इत्ययं धातुः– हृ, **'वर्तमाने लट्'** (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हृ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– हृ झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हृ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– हृ अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– हृ अ अन्त् इ, 'सार्वधातुकार्धधातुकयोः'

(अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– ह् अर् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– ह् अर् अ न्त् इ– हरन्ति।

**उपजायते–** उप इत्युपसर्गपूर्वको जन् इत्ययं धातुः– उप जन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– उप जन् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– उप जन् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण जन् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– उप जन् य त् ए, 'ज्ञाजनोर्जा' (अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण जन् इत्यस्य स्थाने जा इत्ययमादेशः– उप जा य त् ए– उपजायते।

**सञ्जायते–** सम् इत्युपसर्गपूर्वको जन् इत्ययं धातुः– सम् जन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– सम् जन् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– सम् जन् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण जन् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– सम् जन् य त् ए, 'ज्ञाजनोर्जा' (अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण जन् इत्यस्य स्थाने जा इत्ययमादेशः– सम् जा य त् ए, 'मोऽनुस्वारः' (अष्टाध्यायीसूत्रपाठः 8/3/23) इत्यनेन सूत्रेण म् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– सं जा य त् ए, 'वा पदान्तस्य' (अष्टाध्यायीसूत्रपाठः 8/4/58) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (ञ्) इत्ययमादेशः– स ञ् जा य त् ए– सञ्जायते।

**अभिजायते–** अभि इत्युपसर्गपूर्वको जन् इत्ययं धातुः– अभि जन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– अभि जन् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– अभि जन् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण जन् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– अभि जन् य त् ए, 'ज्ञाजनोर्जा' (अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण जन् इत्यस्य स्थाने जा इत्ययमादेशः– अभि जा य त् ए– अभिजायते।

**प्रणश्यति–** प्र इत्युपसर्गपूर्वको णश् इत्ययं धातुः– प्र णश्, 'णो नः' (अष्टाध्यायीसूत्रपाठः 6/1/63) इत्यनेन सूत्रेण ण् इत्यस्य स्थाने न् इत्ययमादेशः– प्र न् अ श्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण न् अ श् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– प्र न् अ श् ति, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण न् अ श् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– प्र न् अ श् य ति, 'उपसर्गादसमासेऽपि णोपदेशस्य' (अष्टाध्यायीसूत्रपाठः 8/4/14) इत्यनेन सूत्रेण न् इत्यस्य स्थाने ण् इत्ययमोदशः– प्र ण् अ श् य् ति– प्रणश्यति।

**अधिगच्छति–** अधि इत्युपसर्गपूर्वको गम् इत्ययं धातुः– अधि गम्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण गम् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अधि गम् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण गम् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अधि गम् अ ति, 'इषुगमियमां छः' (अष्टाध्यायीसूत्रपाठः 7/3/77) इत्यनेन सूत्रेण म् इत्यस्य स्थाने छ् इत्ययमादेशः– अधि ग छ् अ ति, 'छे च' (अष्टाध्यायीसूत्रपाठः 6/1/71) इत्यनेन सूत्रेण अ इत्यस्यान्ते तुक् (त्) इत्ययमागमः– अधि ग त् छ् अ ति, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण त् इत्यस्य स्थाने च् इत्ययमादेशः– अधि ग च् छ् अ ति– अधिगच्छति।

**पर्यवतिष्ठे–** परि अव इत्युपसर्गपूर्वकः स्था इत्ययं धातुः– परि अव स्था, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण स्था इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– परि अव स्था त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– परि अव स्था त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स्था इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– परि अव स्था शप् त् ए, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण स्था इत्यस्य स्थाने तिष्ठ् इत्ययमादेशः– परि अव तिष्ठ् अ त् ए, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण इ इत्यस्य स्थाने यण् (य्) इत्ययमादेशः– पर् य् अव तिष्ठ् अ त् ए– पर्यवतिष्ठते।

**अनुविधीयते–** अनु वि इत्युपसर्गपूर्वको धा इत्ययं धातुः– अनु वि धा, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण धा इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– अनु वि धा त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थाने ए इत्ययमादेशः– अनु वि धा त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण धा इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– अनु वि धा य त् ए, 'घुमास्थागापाजहातिसां हलि' (अष्टाध्यायीसूत्रपाठः 6/4/66) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ई इत्ययमादेशः– अनु वि ध् ई य त् ए– अनुविधीयते।

**हरति–** हृ इत्ययं धातुः– हृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हृ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– हृ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हृ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– हृ अ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– ह् अर् अ ति– हरति।

**जागर्ति–** जागृ इत्ययं धातुः– जागृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जागृ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– जागृ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण जागृ इत्यस्मात् परः शप् इत्ययं प्रत्ययः– जागृ शप् ति, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– जागृ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– जाग् अर् ति– जागर्ति।

**जाग्रति–** जागृ इत्ययं धातुः– जागृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जागृ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– जागृ झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68)

इत्यनेन सूत्रेण जागृ इत्यस्मात् परः शप् इत्ययं प्रत्ययः– जागृ शप् झि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– जागृ झि, 'अदभ्यस्तात्' (अष्टाध्यायीसूत्रपाठः 7/1/4) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अत् इत्ययमादेशः– जागृ अत् इ, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने यण् (र्) इत्ययमादेशः– जाग् र् अत् इ– जाग्रति।

**प्रविशन्ति–** प्र इत्युपसर्गपूर्वको विश् इत्ययं धातुः– प्र विश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विश् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– प्र विश् झि, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण विश् इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– प्र विश् अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– प्र विश् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– प्र विश् अ न्त् इ– प्रविशन्ति।

**आप्नोति–** आप् इत्ययं धातुः– आप्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण आप् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– आप् ति, 'स्वादिभ्यः श्नुः' (अष्टाध्यायीसूत्रपाठः 3/1/73) इत्यनेन सूत्रेण आप् इत्यस्मात् परः श्नु (नु) इत्ययं प्रत्ययः– आप् नु ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– आप् न् ओ ति– आप्नोति।

**चरति–** चर् इत्ययं धातुः– चर्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण चर् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– चर् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण चर् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– चर् अ ति– चरति।

**विमुह्यति–** वि इत्युपसर्गपूर्वको मुह् इत्ययं धातुः– वि मुह्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण मुह् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– वि मुह् ति, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण मुह् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– वि मुह् य ति– विमुह्यति।

**ऋच्छति–** ऋछ् इत्ययं धातुः– ऋछ्, 'छे च' (अष्टाध्यायीसूत्रपाठः 6/1/71) इत्यनेन सूत्रेण ऋ इत्यस्यान्ते तुक् (त्) इत्ययमागमः– ऋ त् छ्, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण त् इत्यस्य स्थाने च् इत्ययमादेशः– ऋ च् छ्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ऋ च् छ् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– ऋ च् छ् ति, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण ऋ च् छ् इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– ऋ च् छ् अ ति– ऋच्छति। इति।।

**सन्दर्भाः–**


1. अष्टाध्यायीसूत्रपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
2. धातुपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
3. अष्टाध्यायीभाष्यम् (प्रथमावृत्तिः), त्रयो भागाः– लेखकौ– पण्डित ब्रह्मदत्त जिज्ञासु, प्रज्ञादेवी व्याकरणाचार्या, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
4. माधवीया धातुवृत्तिः (सायणविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
5. पारिभाषिकः– व्याख्याकारः– आचार्य प्रद्युम्न, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
6. वार्तिकप्रकाशः– लेखकः– आनन्दप्रकाश मेधार्थी, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।
7. काशिका (वामनजयादित्यविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
8. व्याकरणमहाभाष्यम् (महर्षिपतञ्जलिमुनिविरचितम्, प्रदीपोद्द्योतटीकाद्वयसहितम्), षड् भागाः– सम्पादकः– श्री भार्गव शास्त्री, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।